**आक्षिप्त** त्रि० आ+क्षिप-क्त । १कृताक्षेपे यस्याक्षेपः कृतस्तस्मिन् २आकृष्टे च ।

**आक्षीव** पु० आ+क्षीव-णिच्-अच् । १शोभाञ्जनवृक्षे । क्षीव-क्त नि० क्षीबोमत्तः प्रादि० । २ईषन्मत्ते ३सम्यक्प्रमत्ते च त्रि० ।

**आक्षेप** पु० आ+क्षिप-घञ् । १भर्त्सने, २अपवादे, ३आकर्षणे, धनादिन्यासरूपे, ४निक्षेपे ५अर्थालङ्कारभेदे स च २६४पृष्ठे दृश्यः। ६विनिवेशने “गोरोचनाक्षेपनितान्तगौरैः” कुमा० ७उपस्थापने “स्वसिद्धये पराक्षेपः परार्थे स्वसमर्पणम् । उपादानं लक्षणं चेति” काव्यप्र० । ८अनुमाने यथा जातिशक्तिवादिनां मते व्यक्तेराक्षेपात् बोधः । सचानुमानमेव । तथा हि गामानयेति वाक्ये गोत्वकर्म्मकानयनं गोकर्म्मकानयनं विनाऽनुपपन्नमित्यनुपपत्तिज्ञानेन गोत्वाश्रयस्य व्यक्तेरनुमानेन भानम् । यथोक्तं शब्दशक्ति० “गामानयेत्यादौ गोत्वादिकर्म्मकत्वेनैवानयनादेरन्वयधीः गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यानयनबुद्धिं प्रत्येवहेतुत्वात् गामनयेत्यादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्म्मताकत्वेन बोधस्तूत्तरकालमाक्षेपात् । कर्म्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात्, आनयनं गोवृत्तिकर्मताकम् गोत्ववृत्तिकर्मताकत्वादित्याद्यनुमानसाम्राज्यात्” । ९भर्त्सिस्कारवचने च “विरुद्धमाक्षेपवचस्तितिक्षतः” किरा० ।

**आक्षेपक** त्रि०आ+क्षिप-ण्वुल् । १निन्दके २आकर्षके । “यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः । तदा क्षिपत्याशु मुहुर्मुहुर्देहं नभश्चरः । मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृत” इत्युक्तलक्षणे ३वातरोगभेदे ४व्याधे च पु०मेदि० ।

**आक्षेपण** न० आ+क्षिप-ल्युट् । आक्षेपार्थे “पतनपीडनप्रहाराक्षेपणव्यालस्वगदशनप्रभृतिभिरभिघातविशेषैः” सुश्रु० ।

**आ(अ)क्षैत्रज्ञ** न० अक्षेत्रज्ञ एव ब्राह्मणा० स्वार्थे ष्यञ् । द्विपदवृद्धिः पूर्व्वपदस्य वा । अक्षेत्रज्ञे क्षेत्रानभिज्ञे ।

**आक्षेपिन्** त्रि०आक्षिपति आ+क्षिप-णिनि । १आकर्षके । आक्षेपः स्वच्छन्दृष्ट्या पर्य्यालोचमस्त्यस्य इनि । २स्वच्छदृष्ट्या आलोचनपूर्व्वकाकर्षके च । “बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः” पात०सू० । प्राणायामशब्दे विवृतिः ।

**आक्षोट** पु० आ+अक्ष-ओट । शैलपीलुभेदे ।

**आक्षोड** पु० आ+अक्ष-ओड् । शैलपीलुवृक्षे ( आखरोट ) इति ख्याते । “विल्वामलकमृद्वीकाफलमाम्रातदाड़िमम् । भव्यं प्राचीनवताक्षोडम्” स्मृतिः “आक्षोडमुजम्बुफलकारफलं काश्मीरप्रसिद्धम्” आह्निकतत्त्वे रघुनन्दनः ।

**आख** पु० आखनत्यनेन आ+खन-ड । खनित्रे । अच् स्वार्थे कन् गौरा० पाठान्तरम् ङीप् । आखकी क्षुद्रखनित्रे स्त्री ।

**आखण्डल** पु० आखण्डयति भेदयति पर्व्वतान् आ+खडि-डलच् डस्य नेत्त्वम् । इन्द्रे । “आखण्डलः काममिदं बभाषे” कुमा० “तमीशः कामरूपाणामत्याखण्डलविक्रमः” रघुः । [ पूर्व्वपदाद्युदात्तम् ।

**आखण्डि** आ+खण्ड-इन् आखण्डके भेदके पत्राादि० ।

**आखन** पु० आखनत्यनेन आ+खन-घ । खननसाधने खनित्रे । वेदे तु पू०णत्वम् । “एवं तथाख्यानमाखण त्वा” छा०उ० । न शक्यते खनितुं कुद्दालादिभिरपि टङ्कैश्छेत्तुं न शक्योऽखणस्तस्त्वा” शा०भाष्यम् ।

**आखनिक** आ+खन-कर्त्तरि इकन् । १चौरे, २शूकरे, ३मूषिके च ४खननकर्त्तरि त्रि० ।

**आखनिवक** पु०आ+खन-करणे कर्त्तरि वा इकवक । खनित्रे १चौरे २शूकरे ३मूषिके च ५खनके त्रि० । उर । आखरोप्यत्र । पालेसमितादिः युक्तारोह्यादिश्च ।

**आखर** पु० आ+खन-करणे ड । खनित्रे ।

**आखरेष्ठ** त्रि० आखरे तिष्ठति स्था-क षत्वम् वेदे नित्यमलुक् । आखरे स्थिते “कृष्णोऽस्याखरेष्ठः” सि०कौ० ।

**आखान** पु० आ+खन घञ् । समन्तात् खनने ।

**आखु** पु० आ+खन-डु । १मूषिके, २चौरे, ३शूकरे च । कर्म्मणि डु । ४देवताड़वृक्षे । “विभवे सति नैवास्ति न ददाति जुहोति न । तमाहुराखु”मित्युक्तलक्षणे ५कृपणे च

**आखुकर्णपर्णिका** स्त्री आखुकर्णाविव पर्णान्यस्या वा कप् । (उन्दुरकाणी) लतायाम् ।

**आखुकर्णी** स्त्री आखोः मूषिकस्य कर्ण इव पर्णमस्याः ङीप् (उन्दुरकाणी) मूषिककर्णतुल्यपर्णयुक्तायां लतायाम् ।

**आखुग** पु० आखुना मूषिकेण गच्छति । गम-ड । मूषिकवाहने गणेशे । तस्य यथा मूषिकवाहनत्वं तथा गणेशशब्दे वक्ष्यते आखुवाहनादयोऽप्यत्र ।

**आखुपर्णिका** स्त्री आखुः तत्कर्णाविव पर्णमस्याः वा कप् । (उन्दुरकाणी)वृक्षे । कबभावे ङीप् । आखुपर्णीत्यपि तत्रैव ।

**आखुभुज्** पु०आखुं भुङ्क्ते भुज-क्विप् । मूषिकभक्षके विड़ाले । क । आखुभुजोऽप्यत्र ।